श्रीललितासहस्रनामस्तोत्रम् नारदपुराणान्तर्गतम्

{॥ ललितासहस्रनामस्तोत्रम् ॥}

॥ नारदपुराणान्तर्गते सकवच श्रीललितासहस्रनामस्तोत्रम् ॥

सनत्कुमार उवाच-

अथा सामावृतिस्थानां शक्तीनां समयेन च ।

or together ?? अथासामावृतिस्थानां as अथ असां आवृत्तिस्थानां शक्तीनां

नाम्नां सहस्रं वक्ष्यामि गुरुध्यानपुरःसरम् ॥ १॥

नाथा नव प्रकाशाद्याः सुभगान्ताः प्रकीर्तिताः ।

भूम्यादीनि शिवान्तानि विद्धि तत्त्वानि नारद ॥ २॥

गुरुजन्मादिपर्वाणि दर्शान्तानि च सप्त वै ।

एतानि प्राङ्मनोवृत्त्या चिन्तयेत्साधकोत्तमः ॥ ३॥

गुरुस्तोत्रं जपेच्चापि तद्गतेनान्तरात्मना ।

नमस्ते नाथ भगवञ्शिवाय गुरुरूपिणे ॥ ४॥

विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ।

नवाय नवरूपाय परमार्थैकरूपिणे ॥ ५॥

सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ।

स्वतन्त्राय दयाकॢप्तविग्रहाय शिवात्मने ॥ ६॥

परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ।

विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥ ७॥

प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ।

पुरस्तात्पार्श्वयोः पृष्ठे नमः कुर्यामुपर्यधः ॥ ८॥

सदा मच्चित्तसदने विधेहि भवदासनम् ।

इति स्तुत्वा गुरुं भक्त्या परां देवीं विचिन्तयेत् ॥ ९॥

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।

देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम् ॥ १०॥

प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।

कालह्वल्लोहलोल्लोहकलानाशनकारिणीम् ॥ ११॥

यदक्षरैकमात्रेऽपि संसिद्धे स्पर्द्धते नरः ।

रविताक्ष्येन्दुकन्दर्पैः शङ्करानलविष्णुभिः ॥ १२॥

यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।

वन्दे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ॥ १३॥

यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ।

ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम् ॥ १४॥

यदेकादशमाधारं बीजं कोणत्रयोद्भवम् ।

ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ॥ १५॥

अकचादिटतोन्नद्धपयशाक्षरवर्गिणीम् ।

ज्येष्ठाङ्गबाहुहृत्कण्ठकटिपादनिवासिनीम् ॥ १६॥

नौमीकाराक्षरोद्धारां सारात्सारां परात्पराम् ।

प्रणमामि महादेवीं परमानन्दरूपिणीम् ॥ १७॥

अथापि यस्या जानन्ति न मनागपि देवताः ।

केयं कस्मात्क्व केनेति सरूपारूपभावनाम् ॥ १८॥

वन्दे तामहमक्षय्यां क्षकाराक्षररूपिणीम् ।

देवीं कुलकलोल्लोलप्रोल्लसन्तीं शिवां पराम् ॥ १९॥

वर्गानुक्रमयोगेन यस्याख्योमाष्टकं स्थितम् ।

वन्दे तामष्टवर्गोत्थमहासिद्ध्यादिकेश्वरीम् ॥ २०॥

कामपूर्णजकाराख्यसुपीठान्तर्न्निवासिनीम् ।

चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ॥ २१॥

एतत्स्तोत्रं तु नित्यानां यः पठेत्सुसमाहितः ।

पूजादौ तस्य सर्वास्ता वरदाः स्युर्न संशयः ॥ २२॥

अथ ते कवचं देव्या वक्ष्ये नवरतात्मकम् ।

येन देवासुरनरजयी स्यात्साधकः सदा ॥ २३॥

सर्वतः सर्वदाऽऽत्मानं ललिता पातु सर्वगा ।

कामेशी पुरतः पातु भगमाली त्वनन्तरम् ॥ २४॥

दिशं पातु तथा दक्षपार्श्वं मे पातु सर्वदा ।

नित्यक्लिन्नाथ भेरुण्डा दिशं मे पातु कौणपीम् ॥ २५॥

तथैव पश्चिमं भागं रक्षताद्वह्निवासिनी ।

महावज्रेश्वरी नित्या वायव्ये मां सदावतु ॥ २६॥

वामपार्श्वं सदा पातु इतीमेलरिता ततः ।

माहेश्वरी दिशं पातु त्वरितं सिद्धदायिनी ॥ २७॥

पातु मामूर्ध्वतः शश्वद्देवता कुलसुन्दरी ।

अधो नीलपताकाख्या विजया सर्वतश्च माम् ॥ २८॥

करोतु मे मङ्गलानि सर्वदा सर्वमङ्गला ।

देहेन्द्रियमनःप्राणाञ्ज्वालामालिनिविग्रहा ॥ २९॥

पालयत्वनिशं चित्ता चित्तं मे सर्वदावतु ।

कामात्क्रोधात्तथा लोभान्मोहान्मानान्मदादपि ॥ ३०॥

पापान्मां सर्वतः शोकात्सङ्क्षयात्सर्वतः सदा ।

असत्यात्क्रूरचिन्तातो हिंसातश्चौरतस्तथा ।

स्तैमित्याच्च सदा पान्तु प्रेरयन्त्यः शुभं प्रति ॥ ३१॥

नित्याः षोडश मां पान्तु गजारूढाः स्वशक्तिभिः ।

तथा हयसमारूढाः पान्तु मां सर्वतः सदा ॥ ३२॥

सिंहारूढास्तथा पान्तु पान्तु ऋक्षगता अपि ।

रथारूढाश्च मां पान्तु सर्वतः सर्वदा रणे ॥ ३३॥

तार्क्ष्यारूढाश्च मां पान्तु तथा व्योमगताश्च ताः ।

भूतगाः सर्वगाः पान्तु पान्तु देव्यश्च सर्वदा ॥ ३४॥

भूतप्रेतपिशाचाश्च परकृत्यादिकान् गदान् ।

द्रावयन्तु स्वशक्तीनां भूषणैरायुधैर्मम ॥ ३५॥

गजाश्वद्वीपिपञ्चास्यताक्ष्यारूढाखिलायुधाः ।

असङ्ख्याः शक्तयो देव्यः पान्तु मां सर्वतः सदा ॥ ३६॥

सायं प्रातर्जपन्नित्याकवचं सर्वरक्षकम् ।

कदाचिन्नाशुभं पश्येत्सर्वदानन्दमास्थितः ॥ ३७॥

इत्येतत्कवचं प्रोक्तं ललितायाः शुभावहम् ।

यस्य सन्धारणान्मर्त्यो निर्भयो विजयी सुखी ॥ ३८॥

अथ नाम्नां सहस्रं ते वक्ष्ये सावरणार्चनम् ।

षोडशानामपि मुने स्वस्वक्रमगतात्मकम् ॥ ३९॥

ललिता चापि वा कामेश्वरी च भगमालिनी ।

नित्यक्लिन्ना च भेरुण्डा कीर्तिता वह्निवासिनी ॥ ४०॥

वज्रेश्वरी तथा दूती त्वरिता कुलसुन्दरी ।

नित्या संवित्तथा नीलपताका विजयाह्वया ॥ ४१॥

सर्वमङ्गलिका चापि ज्वालामालिनिसञ्ज्ञिता ।

चित्रा चेति क्रमान्नित्याः षोडशापीष्टविग्रहाः ॥ ४२॥

कुरुकुल्ला च वाराही द्वे एते चेष्टविग्रहे ।

वशिनी चापि कामेशी मोहिनी विमलारुणा ॥ ४३॥

तपिनी च तथा सर्वेश्वरीचाप्यथ कौलिनी ।

मुद्राणन्तनुरिष्वर्णरूपा चापार्णविग्रहा ॥ ४४॥

पाशवर्णशरीरा चाकुर्वर्णसुवपुर्द्धरा ।

त्रिखण्डा स्थापनी सन्निरोधनी चावगुण्ठनी ॥ ४५॥

सन्निधानेषु चापाख्या तथा पाशाङ्कुशाभिधा ।

नमस्कृतिस्तथा सङ्क्षोभणी विद्रावणी तथा ॥ ४६॥

आकर्षणी च विख्याता तथैवावेशकारिणी ।

उन्मादिनी महापूर्वा कुशाथो खेचरी मता ॥ ४७॥

बीजा शक्त्युत्थापना च स्थूलसूक्ष्मपराभिधा ।

अणिमा लघिमा चैव महिमा गरिमा तथा ॥ ४८॥

प्राप्तिः प्रकामिता चापि चेशिता वशिता तथा ।

भुक्तिः सिद्धिस्तथैवेच्छा सिद्धिरूपा च कीर्तिता ॥ ४९॥

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।

वाराहीन्द्राणी चामुण्डा महालक्ष्मीस्वरूपिणी ॥ ५०॥

कामा बुद्धिरहङ्कारशब्दस्पर्शस्वरूपिणी ।

रूपरूपा रसाह्वा च गन्धवित्तधृतिस्तथा ॥ ५१॥

नाभबीजामृताख्या च स्मृतिदेहात्मरूपिणी ।

कुसुमा मेखला चापि मदना मदनातुरा ॥ ५२॥

रेखा संवेगिनी चैव ह्यङ्कुशा मालिनीति च ।

सङ्क्षोभिणी तथा विद्राविण्याकर्षणरूपिणी ॥ ५३॥

आह्लादिनीति च प्रोक्ता तथा सम्मोहिनीति च ।

स्तम्भिनी जम्भिनी चैव वशङ्कर्यथ रञ्जिनी ॥ ५४॥

उन्मादिनी तथैवार्थसाधिनीति प्रकीर्तिता ।

सम्पत्तिपूर्णा सा मन्त्रमयी द्वन्द्वक्षयङ्करी ॥ ५५॥

सिद्धिः सम्पत्प्रदा चैव प्रियमङ्गलकारिणी ।

कामप्रदा निगदिता तथा दुःखविमोचिनी ॥ ५६॥

मृत्युप्रशमनी चैव तथा विघ्ननिवारिणी ।

अङ्गसुन्दरिका चैव तथा सौभाग्यदायिनी ॥ ५७॥

ज्ञानैश्वर्यप्रदा ज्ञानमयी चैव च पञ्चमी ।

विन्ध्यवासनका घोरस्वरूपा पापहारिणी ॥ ५८॥

तथानन्दमयी रक्षारूपेप्सितफलप्रदा ।

जयिनी विमला चाथ कामेशी वज्रिणी भगा ॥ ५९॥

त्रैलोक्यमोहना स्थाना सर्वाशापरिपूरणी ।

सर्वसंक्षोभणगता सौभाग्यप्रदसंस्थिता ॥ ६०॥

सवार्थसाधकागारा सर्वरोगहरास्थिता ।

सर्वरक्षाकरास्थाना सर्वसिद्धिप्रदस्थिता ॥ ६१॥

सर्वानन्दमयाधारबिन्दुस्थानशिवात्मिका ।

प्रकृष्टा च तथा गुप्ता ज्ञेया गुप्ततरापि च ॥ ६२॥

सम्प्रदायस्वरूपा च कुलकौलनिगर्भगा ।

रहस्यापरापरप्राकृत्तथैवातिरहस्यका ॥ ६३॥

त्रिपुरा त्रिपुरेशी च तथैव पुरवासिनी ।

श्रीमालिनी च सिद्धान्ता महात्रिपुरसुन्दरी ॥ ६४॥

नवरत्नमयद्वीपनवखण्डविराजिता ।

कल्पकोद्यानसंस्था च ऋतुरूपेन्द्रियार्चका ॥ ६५॥

कालमुद्रा मातृकाख्या रत्नदेशोपदेशिका ।

तत्त्वाग्रहाभिधा मूर्तिस्तथैव विषयद्विपा ॥ ६६॥

देशकालाकारशब्दरूपा सङ्गीतयोगिनी ।

समस्तगुप्तप्रकटसिद्धयोगिनिचक्रयुक् ॥ ६७॥

वह्निसूर्येन्दुभूताह्वा तथात्माष्टाक्षराह्वया ।

पञ्चधार्चास्वरूपा च नानाव्रतसमाह्वया ॥ ६८॥

निषिद्धाचाररहिता सिद्धचिह्नस्वरूपिणी ।

चतुर्द्धा कूर्मभागस्था नित्याद्यर्चास्वरूपिणी ॥ ६९॥

दमनादिसमभ्यर्चा षट्कर्मसिद्धिदायिनी ।

तिथिवारपृथग्द्रव्यसमर्चनशुभावहा ॥ ७०॥

वायोश्यनङ्गकुसुमा तथैवानङ्गमेखला ।

अनङ्गमदनानङ्गमदनातुरसाह्वया ॥ ७१॥

मददेगिनिका चैव तथा भुवनपालिनी ।

शशिलेखा समुद्दिष्टा गतिलेखाह्वया मता ॥ ७२॥

श्रद्धा प्रीती रतिश्चैव धृतिः कान्तिर्मनोरमा ।

मनोहरा समाख्याता तथैव हि मनोरथा ॥ ७३॥

मदनोन्मादिनी चैव मोदिनी शङ्खिनी तथा ।

शोषिणी चैव शङ्कारी सिञ्जिनी सुभगा तथा ॥ ७४॥

पूषाचेद्वासुमनसा रतिः प्रीतिर्धृतिस्तथा ।

ऋद्धिः सौम्या मरीचिश्च तथैव ह्यंशुमालिनी ॥ ७५॥

शशिनी चाङ्गिरा छाया तथा सम्पूर्णमण्डला ।

तुष्टिस्तथामृताख्या च डाकिनी साथ लोकपा ॥ ७६॥

बटुकेभास्वरूपा च दुर्गा क्षेत्रेशरूपिणी ।

कामराजस्वरूपा च तथा मन्मथरूपिणी ॥ ७७॥

कन्दर्प्परूपिणी चैव तथा मकरकेतना ।

मनोभवस्वरूपा च भारती वर्णरूपिणी ॥ ७८॥

मदना मोहिनी लीला जम्भिनी चोद्यमा शुभा ।

ह्लादिनी द्राविणी प्रीती रती रक्ता मनोरमा ॥ ७९॥

सर्वोन्मादा सर्वमुखा ह्यभङ्गा चामितोद्यमा ।

अनल्पाव्यक्तविभवा विविधाक्षोभविग्रहा ॥ ८०॥

रागशक्तिर्द्वेषशक्तिस्तथा शब्दादिरूपिणी ।

नित्या निरञ्जना क्लिन्ना क्लेदिनी मदनातुरा ॥ ८१॥

मदद्रवा द्राविणी च द्रविणी चेति कीर्तिता ।

मदाविला मङ्गला च मन्मथानी मनस्विनी ॥ ८२॥

मोहा मोदा मानमयी माया मन्दा मितावती ।

विजया विमला चैव शुभा विश्वा तथैव च ॥ ८३॥

विभूतिर्विनता चैव विविधा विनता क्रमात् ।

कमला कामिनी चैव किराता कीर्तिरूपिणी ॥ ८४॥

कुट्टिनी च समुद्दिष्टा तथैव कुलसुन्दरी ।

कल्याणी कालकोला च डाकिनी शाकिनी तथा ॥ ८५॥

लाकिनी काकिनी चैव राकिनी काकिनी तथा ।

इच्छाज्ञाना क्रियाख्या चाप्यायुधाष्टकधारिणी ॥ ८६॥

कपर्दिनी समुद्दिष्टा तथैव कुलसुन्दरी ।

ज्वालिनी विस्फुलिङ्गा च मङ्गला सुमनोहरा ॥ ८७॥

कनका किनवा विद्या विविधा च प्रकीर्तिता ।

मेषा वृषाह्वया चैव मिथुना कर्कटा तथा ॥ ८८॥

सिंहा कन्या तुला कीटा चापा च मकरा तथा ।

कुम्भा मीना च सारा च सर्वभक्षा तथैव च ॥ ८९॥

विश्वात्मा विविधोद्भूतचित्ररूपा च कीर्तिता ।

निःसपत्ना निरातङ्का याचनाचिन्त्यवैभवा ॥ ९०॥

रक्ता चैव ततः प्रोक्ता विद्याप्राप्तिस्वरूपिणी ।

ह्लल्लेखा क्लेदिनी क्लिन्ना क्षोभिणी मदनातुरा ॥ ९१॥

निरञ्जना रागवती तथैव मदनावती ।

मेखला द्राविणी वेगवती चैव प्रकीर्तिता ॥ ९२॥

कमला कामिनी कल्पा कला च कलिताद्भुता ।

किराता च तथा काला कदना कौशिका तथा ॥ ९३॥

कम्बुवादनिका चैव कातरा कपटा तथा ।

कीर्तिश्चापि कुमारी च कुङ्कुमा परिकीर्तिता ॥ ९४॥

भञ्जिनी वेगिनी नागा चपला पेशला सती ।

रतिः श्रद्धा भोगलोला मदोन्मत्ता मनस्विनी ॥ ९५॥

विह्वला कर्षिणी लोला तथा मदनमालिनी ।

विनोदा कौतुका पुण्या पुराणा परिकीर्तिता ॥ ९६॥

वागीशी वरदा विश्वा विभवा विघ्नकारिणी ।

बीजविघ्नहरा विद्या सुमुखी सुन्दरी तथा ॥ ९७॥

सारा च सुमना चैव तथा प्रोक्ता सरस्वती ।

समया सर्वगा विद्धा शिवा वाणी च कीर्तिता ॥ ९८॥

दूरसिद्धा तथा प्रोक्ताथो विग्रहवती मता ।

नादा मनोन्मनी प्राणप्रतिष्ठारुणवैभवा ॥ ९९॥

प्राणापाना समाना च व्यानोदाना च कीर्तिता ।

नागा कूर्मा च कृकला देवदत्ता धनञ्जया ॥ १००॥

फट्कारी किङ्करााध्या जया च विजया तथा ।

हुङ्कारी खेचरी चण्डं छेदिनी क्षपिणी तथा ॥ १०१॥

स्त्रीहुङ्कारी क्षेमकारी चतुरक्षररूपिणी ।

श्रीविद्यामतवर्णाङ्गी काली याम्या नृपार्णका ॥ १०२॥

भाषा सरस्वती वाणी संस्कृता प्राकृता परा ।

बहुरूपा चित्तरूपा रम्यानन्दा च कौतुका ॥ १०३॥

त्रयाख्या परमात्माख्याप्यमेयविभवा तथा ।

वाक्स्वरूपा बिन्दुसर्गरूपा विश्वात्मिका तथा ॥ १०४॥

तथा त्रैपुरकन्दाख्या ज्ञात्रादित्रिविधात्मिका ।

आयुर्लक्ष्मीकीर्तिभोगसौन्दर्यारोग्यदायिका ॥ १०५॥

ऐहिकामुष्मिकज्ञानमयी च परिकीर्तिता ।

जीवाख्या विजयाख्या च तथैव विश्वविन्मयी ॥ १०६॥

हृदादिविद्या रूपादिभानुरूपा जगद्वपुः ।

विश्वमोहनिका चैव त्रिपुरामृतसञ्ज्ञिका ॥ १०७॥

सर्वाप्यायनरूपा च मोहिनी क्षोभणी तथा ।

क्लेदिनी च समाख्याता तथैव च महोदया ॥ १०८॥

सम्पत्करी हलक्षार्णा सीमामातृतनू रतिः ।

प्रीतिर्मनोभवा वापि प्रोक्ता वाराधिपा तथा ॥ १०९॥

त्रिकूटा चापि षट्कूटा पञ्चकूटा विशुद्धगा ।

अनाहतगता चैव मणिपूरकसंस्थिता ॥ ११०॥

स्वाधिष्ठानसमासीनाधारस्थाज्ञासमास्थिता ।

षट्त्रिंशत्कूटरूपा च पञ्चाशन्मिथुनात्मिका ॥ १११॥

पादुकादिकसिद्धीशा तथा विजयदायिनी ।

कामरूपप्रदा वेतालरूपा च पिशाचिका ॥ ११२॥

विचित्रा विभ्रमा हंसी भीषणी जनरञ्जिका ।

विशाला मदना तुष्टा कालकण्ठी महाभया ॥ ११३॥

माहेन्द्री शङ्खिनी चैन्द्री मङ्गला वटवासिनी ।

मेखला सकला लक्ष्मीर्मालिनी विश्वनायिका ॥ ११४॥

सुलोचना सुशोभा च कामदा च विलासिनी ।

कामेश्वरी नन्दिनी च स्वर्णरेखा मनोहरा ॥ ११५॥

प्रमोदा रागिणी सिद्धा पद्मिनी च रतिप्रिया ।

कल्याणदा कलादक्षा ततश्च सुरसुन्दरी ॥ ११६॥

विभ्रमा वाहका वीरा विकला कोरका कविः ।

सिंहनादा महानादा सुग्रीवा मर्कटा शठा ॥ ११७॥

बिडालाक्षा बिडालास्या कुमारी खेचरी भवा ।

मयूरा मङ्गला भीमा द्विपवक्त्रा खराननना ॥ ११८॥

मातङ्गी च निशाचारा वृषग्राहा वृकाननना ।

सैरिभास्या गजमुखा पशुवक्त्रा मृगाननना ॥ ११९॥

क्षोभका मणिभद्रा च क्रीडका सिंहचक्रका ।

महोदरा स्थूलशिखा विकृतास्या वराननना ॥ १२०॥

चपला कुक्कुटास्या च पाविनी मदनालसा ।

मनोहरा दीर्घजङ्घा स्थूलदन्ता दशाननना ॥ १२१॥

सुमुखा पण्डिता क्रुद्धा वराहास्या सटामुखा ।

कपटा कौतुका काला किङ्करा कितवा खला ॥ १२२॥

भक्षका भयदा सिद्धा सर्वगा च प्रकीर्तिता ।

जया च विजया दुर्गा भद्रा भद्रकरी तथा ॥ १२३॥

अम्बिका वामदेवी च महामायास्वरूपिणी ।

विदारिका विश्वमयी विश्वा विश्वविभञ्जिता ॥ १२४॥

वीरा विक्षोभिणी विद्या विनोदा बीजविग्रहा ।

वीतशोका विषग्रीवा विपुला विजयप्रदा ॥ १२५॥

विभवा विविधा विप्रा तथैव परिकीर्तिता ।

मनोहरा मङ्गला च मदोत्सिक्ता मनस्विनी ॥ १२६॥

मानिनी मधुरा माया मोहिनी च तथा स्मृता ।

भद्रा भवानी भव्या च विशालाक्षी शुचिस्मिता ॥ १२७॥

ककुभा कमला कल्पा कलाथो पूरणी तथा ।

नित्या चाप्यमृता चैव जीविता च तथा दया ॥ १२८॥

अशोका ह्यमला पूर्णा पूर्णा भाग्योद्यता तथा ।

विवेका विभवा विश्वा विततता च प्रकीर्तिता ॥ १२९॥

कामिनी खेचरी गर्वा पुराणा परमेश्वरी ।

गौरी शिवा ह्यमेया च विमला विजया परा ॥ १३०॥

पवित्रा पद्मिनी विद्या विश्वेशी शिववल्लभा ।

अशेषरूपा ह्यानन्दाम्बुजाक्षी चाप्यनिन्दिता ॥ १३१॥

वरदा वाक्यदा वाणी विविधा वेदविग्रहा ।

विद्या वागीश्वरी सत्या संयता च सरस्वती ॥ १३२॥

निर्मलानन्दरूपा च ह्यमृता मानदा तथा ।

पूषा चैव तथा पुष्टिस्तुष्टिश्चापि रतिर्धृतिः ॥ १३३॥

शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ।

पूर्णा पूर्णामृता कामदायिनीन्दुकलात्मिका ॥ १३४॥

तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।

सुषुम्णा भोगदा विश्वा बाधिनी धारिणी क्षमा ॥ १३५॥

धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी ।

सुश्रीः स्वरूपा कपिला हव्यकव्यवहा तथा ॥ १३६॥

घस्मरा विश्वकवला लोलाक्षी लोलजिह्विका ।

सर्वभक्षा सहस्राक्षी निःसङ्गा च गतिप्रिया ॥ १३७॥

अचिन्त्या चाप्रमेया च पूर्णरूपा दुरासदा ।

सर्वा संसिद्धिरूपा च पावनीत्येकरूपिणी ॥ १३८॥

तथा यामलवेधाख्या शाक्ते वेदस्वरूपिणी ।

तथा शाम्भववेधा च भावनासिद्धिसूचिनी ॥ १३९॥

वह्निरूपा तथा दस्रा ह्यमाविध्ना भुजङ्गमा ।

षण्मुखा रविरूपा च माता दुर्गा दिशा तथा ॥ १४०॥

धनदा केशवा चापि यमी चैव हरा शशा ।

अश्विनी च यमी वह्निरूपा धात्रीति कीर्तिता ॥ १४१॥

चन्द्रा शिवादितिर्जीवा सर्पिणी पितृरूपिणी ।

अर्यम्णा च भगा सूर्या त्वाष्ट्रिमारुतिसञ्ज्ञिका ॥ १४२॥

इन्द्राग्निरूपा मित्रा चापीन्द्राणी निरृतिर्जला ।

वैश्वदेवी हरितभूर्वासवी वरुणा जया ॥ १४३॥

अहिर्बुध्न्या पूषणी च तथा कारस्करामला ।

उदुम्बरा जम्बुका च खदिरा कृष्णरूपिणी ॥ १४४॥

वंशा च पिप्पला नागा रोहिणा च पलाशका ।

पक्षका च तथाम्बष्ठा बिल्वा चार्जुनरूपिणी ॥ १४५॥

विकङ्कता च ककुभा सरला चापि सर्जिका ।

बञ्जुला पनसार्का च शमी हलिप्रियाम्रका ॥ १४६॥

निम्बा मधूकसञ्ज्ञा चाप्यश्वत्था च गजाह्वया ।

नागिनी सर्पिणी चैव शुनी चापि बिडालिकी ॥ १४७॥

छागी मार्जारिका मूषी वृषभा माहिषी तथा ।

शार्दूली सैरिभी व्याघ्री हरिणी च मृगी शुनी ॥ १४८॥

कपिरूपा च गोघण्टा वानरी च नराश्विनी ।

नगा गौर्हस्तिनी चेति तथा षट्चक्रवासिनी ॥ १४९॥

त्रिखण्डा तीरपालाख्या भ्रामणी द्रविणी तथा ।

सोमा सूर्या तिथिर्वारा योगार्क्षा करणात्मिका ॥ १५०॥

यक्षिणी तारणा व्योमशब्दाद्या प्राणिनी च धीः ।

क्रोधिनी स्तम्भिनी चण्डोच्चण्डा ब्राह्म्यादिरूपिणी ॥ १५१॥

सिंहस्था व्याघ्रगा चैव गजाश्वगरुडस्थिता ।

भौमाप्या तैजसी वायुरूपिणी नाभसा तथा ॥ १५२॥

एकवक्त्रा चतुर्वक्त्रा नववक्त्रा कलानना ।

पञ्चविंशतिवक्त्रा च षड्विंशद्वदना तथा ॥ १५३॥

ऊनपञ्चाशदास्या च चतुःषष्टिमुखा तथा ।

एकाशीतिमुखा चैव शताननसमन्विता ॥ १५४॥

स्थूलरूपा सूक्ष्मरूपा तेजोविग्रहधारिणी ।

वृणावृत्तिस्वरूपा च नाथावृत्तिस्वरूपिणी ॥ १५५॥

तत्त्वावृत्तिस्वरूपापि नित्यावृत्तिवपुर्द्धरा ॥ १५६॥

अङ्गावृत्तिस्वरूपा चाप्यायुधावृत्तिरूपिणी ।

गुरुपङ्क्तिस्वरूपा च विद्यावृत्तितनुस्तथा ॥ १५७॥

ब्रह्माद्यावृत्तिरूपा च परा पश्यन्तिका तथा ।

मध्यमा वैखरी शीर्षकण्ठताल्वोष्ठदन्तगा ॥ १५८॥

जिह्वामूलगता नासागतोरःस्थलगामिनी ।

पदवाक्यस्वरूपा च वेदभाषास्वरूपिणी ॥ १५९॥

सेकाख्या वीक्षणाख्या चोपदेशाख्या तथैव च ।

व्याकुलाक्षरसङ्केता गायत्री प्रणवादिका ॥ १६०॥

जपहोमार्चनध्यानयन्त्रतर्पणरूपिणी ।

सिद्धसारस्वता मृत्युञ्जया च त्रिपुरा तथा ॥ १६१॥

गारुडा चान्नपूर्णा चाप्यश्वारूढा नवात्मिका ।

गौरी च देवी हृदया लक्षदा च मतङ्गिनी ॥ १६२॥

निष्कत्रयपदा चेष्टावादिनी च प्रकीर्तिता ।

राजलक्ष्मीर्महालक्ष्मीः सिद्धलक्ष्मीर्गवानना ॥ १६३॥

इत्येवं ललितादेव्या दिव्यं नामसहस्रकम् ।

सर्वार्थसिद्धिदं प्रोक्तं चतुर्वर्गफलप्रदम् ॥ १६४॥

एतन्नित्यमुषःकाले यो जपेच्छुद्धमानसः ।

स योगी ब्रह्मविज्ज्ञानी शिवयोगी तथाऽऽत्मवित् ॥ १६५॥

द्विरावृत्त्या प्रजपतो ह्यायुरारोग्यसम्पदः ।

लोकानुरञ्जनं नारीनृपावर्जनकर्म च ॥ १६६॥

अपृथक्त्वेन सिद्ध्यन्ति साधकस्यास्य निश्चितम् ।

त्रिरावृत्त्यास्य वै पुंसो विश्वं भूयाद्वशेऽखिलम् ॥ १६७॥

चतुरावृत्तितश्चास्य समीहितमनारतम् ।

फलत्येव प्रयोगार्हो लोकरक्षाकरो भवेत् ॥ १६८॥

पञ्चावृत्त्या नरा नार्यो नृपा देवाश्च जन्तवः ।

भजन्त्येनं साधकं च देव्यामाहितचेतसः ॥ १६९॥

षडावृत्त्या तन्मयः स्यात्साधकश्चास्य सिद्धयः ।

अचिरेणैव देवीनां प्रसादात्सम्भवन्ति च ॥ १७०॥

सप्तावृत्त्यारिरोगादिकृत्यापस्मारनाशनम् ।

अष्टावृत्त्या नरो भूपान्निग्रहानुग्रहक्षमः ॥ १७१॥

नवावृत्त्या मन्मथाभो विक्षोभयति भूतलम् ।

दशावृत्त्या पठेन्नित्यं वाग्लक्ष्मीकान्तिसिद्धये ॥ १७२॥

रुद्रा वृत्त्याखिलर्द्धिश्च तदायत्तं जगद्भवेत् ।

अर्कावृत्त्या सिद्धिभिः स्याद्दिग्भिर्मर्त्यो हरोपमः ॥ १७३॥

विश्वावृत्त्या तु विजयी सर्वतः स्यात्सुखी नरः ।

शक्रावृत्त्याखिलेष्टाप्तिः सर्वतो मङ्गलं भवेत् ॥ १७४॥

तिथ्यावृत्त्याखिलानिष्टानयत्नादाप्नुयान्नरः ।

षोडशावृत्तितो भूयान्नरः साक्षान्महेश्वरः ॥ १७५॥

विश्वं स्रष्टुं पालयितुं संहर्तुं च क्षमो भवेत् ।

मण्डलं मासमात्रं वा यो जपेद्यद्यदाशयः ॥ १७६॥

तत्तदेवाप्नुयात्सत्यं शिवस्य वचनं यथा ।

इत्येतत्कथितं विप्र नित्यावृत्त्यर्चनाश्रितम् ॥ १७७॥

नाम्नां सहस्रं मनसोऽभीष्टसम्पादनक्षमम् ॥ १७८॥

॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे तृतीयपादे

बृहदुपाख्याने सकवच श्रीललितासहस्रनामस्तोत्रं सम्पूर्णम् ॥ ८९॥

89th chapter of first part of Naradiyapurana

Encoded by Radhe Shyam Tiware, proofread by Rashmi Sharma

Proofread by PSA Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Lalita Sahasranama Stotram 2 (From Narada Puranam) Lyrics in Devanagari PDF
% File name : lalitAsahasranAmastotramnAradapurANa.itx
% Category : sahasranAma
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Radhe Shyam Tiware
% Proofread by : Rashmi Sharma, PSA Easwaran psaeaswaran at gmail.com
% Source : bRihannAradIyapurANa pUrvabhAge adhyAya 89
% Latest update : May 29, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [December 11, 2015] at Stotram Website